# Radhasahasranamastotram 2

# રાધાસહસ્રનામસ્તોત્રમ્ ૨

## Document Information

Text title : Radhasahasranamastotram 2 from Rudrayamala

File name : rAdhAsahasranAmastotram2.itx

Category : sahasranAma, devii, rAdhA, stotra, devI

Location : doc_devii

Transliterated by : NA

Proofread by : Manish Gavkar

Description-comments : Rudrayamala. See corresponding nAmAvalI.

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# રાધાસહસ્રનામસ્તોત્રમ્ ૨

શ્રીશિવ ઉવાચ -
અથાતઃ સંપ્રવક્ષ્યામિ રાધાનામસહસ્રકમ્ ।
શ‍ૃણુનારદ ભદ્રં તે ગોપનીયં પ્રયત્નતઃ ॥ ૧॥

પ્રાતઃ સાયં નિશીથેવા પઠિતવ્યં મુમુક્ષુભિઃ ।
ત્રિરાચમ્ય શુચિર્ભૂત્વા યો જપેત્સુસમાહિતઃ ॥ ૨॥

સવૈષ્ણવો વિશુદ્ધાત્મા જાયતે નાત્ર સંશયઃ ।
બહુ કિં પઠનાદસ્ય ભવેદ્વિષ્ણુસમઃ પુમાન્ ॥ ૩॥

માસૈકપઠનાદસ્ય ભવેત્સર્વાર્થસિદ્ધિદઃ ।
માસદ્વયેન દેવર્ષે ભવેદ્વૈ વૈષ્ણવોત્તમઃ ॥ ૪॥

સોઽમ્બરીષઃ સ પ્રહ્લાદ ઉદ્ધવઃ સ યુધિષ્ઠિરઃ ।
સભીષ્મ અર્જુનશ્ચૈવ સ્તવરાજં પઠેત્તુ યઃ ॥ ૫॥

અથ કિં બહુનોક્તેન વર્ણનેન પુનઃ પુનઃ ।
યદ્યદિષ્ટતમં લોકે તત્તદાપ્નોતિ સાધકઃ ॥ ૬॥

રહસ્યં કથયામ્યદ્ય યદ્વૈ નામસહસ્રકમ્ ।
ઇદમેવ પુરા પૃષ્ટઃ કૃષ્ણ ઉદ્ધવમૂચિવાન્ ॥ ૭॥

અથ સ્તોત્રમ્ ।
ૐ શ્રીરાધારાધિકાઽઽરાધ્યા રાધાકૃષ્ણશિવાદિભિઃ ।
ગોપિકા ગોપરાજ્ઞી ચ ગોપાનન્દવિધાયિની ॥ ૮॥

ગોપપૂજ્યા ગોપહૃષ્ટા ગોપગોપીભિરાવૃતા ।
ગોપાહ્લાદકરી ગોપી ગોપાગોપશિવઙ્કરી ॥ ૯॥

સુન્દરી સુન્દરાકારા સુન્દરોત્તમવન્દિતા ।
સુન્દરાનન્દસંહૃષ્ટા સુન્દરી બહુભાવિની ॥ ૧૦॥

સૌન્દર્યનિલયારામાભિરામા બહુમાનિતા ।
શ્યામા શ્યામપ્રિયાઽશ્યામા શ્યામાભિવન્દિતા નવા ॥ ૧૧॥

લલિતા લલિતાચારા લલિતાચારશાલિની ।
કૃષ્ણા કૃષ્ણકૃપાકર્ત્રી કૃષ્ણાનન્દપરાયણા ॥ ૧૨॥

કૃષ્ણપ્રિયા કૃષ્ણપૂજ્યા કૃષ્ણાકર્ષણકારિણી ।
કૃષ્ણારાધ્યા કૃષ્ણવન્દ્યા કૃત્સ્નવર્ત્મનિબુદ્ધિદા ॥ ૧૩॥

કૃષ્ણપૂજનસર્વસ્વા કૃષ્ણદર્શનતત્પરા ।
શ્રીકૃષ્ણપદસર્વસ્વા કૃષ્ણકૃષ્ણેતિવાદિની ॥ ૧૪॥

શ્રીકૃષ્ણકાન્તસક્તા ચ કૃષ્ણપ્રેમવિવર્દ્ધિની ॥ ૧૫॥

વિશેષા ચ વિશેષજ્ઞા બલ્લવી વલ્લભાર્ચિતા ।
બલ્લવીનાઞ્ચહાર્દજ્ઞા બલ્લવીનાંસુખાવહા ॥ ૧૬॥

રાસમણ્ડલમધ્યસ્થા રાસકેલિકલોત્સુકા ।
શ્રીકૃષ્ણાલિઙ્ગિતભુજા રાસક્રીડાભિનન્દિની ॥ ૧૭॥

વૃષભાનુસુતારાધા વૃષભાનુસુખપ્રદા ।
વૃષભાનુસુતાદેવી કીર્ત્યાનન્દપ્રદાયિની ॥ ૧૮॥

વૃષભાનુસુતા તન્વી વૃષભાનોઃ કુલધ્વજા ।
સર્વાગમપ્રિયા સર્વાચારતત્પરમાનસા ॥ ૧૯॥

પ્રજાસઞ્જીવની જીવનૌષધીં પરમામૃતા ।
પ્રજાસેવ્યા પ્રજાવન્દ્યા વ્રજમાનુષમુક્તિદા ॥ ૨૦॥

સૌદામિની દામપ્રિયા તપોયુક્તા તપોનિધિઃ ।
તાપસીગીતગુણકા તાપસાનાં ગતિપ્રિયા ॥ ૨૧॥

તપઃ કર્ત્રી તપોયુક્તા તપોમૂર્તિસ્તપોમયી ।
તપસાં સિદ્ધિદા સિદ્ધા સિદ્ધાચારવિચારિણી ॥ ૨૨॥

સિદ્ધાગમા ચ સિદ્ધાખ્યા સિદ્ધિદાત્રી સુખાવહા ।
સુખદાસુખસંહૃષ્ટા સુખાકારાસુખાલયા ॥ ૨૩॥

સખિભિઃ સેવિતાસેવ્યા સેવકાનાં શિવઙ્કરી ।
સેવિકાસેવિતપદા સેવકાર્પિતમાનસા ॥ ૨૪॥

મનોવેગા મનોરૂપા મનોગતિવિડમ્બિની ।
મનસઃપ્રેરિકા માયા માયામયવિનાશિની ॥ ૨૫॥

મોક્ષદા મોક્ષમાર્ગજ્ઞા મોક્ષમાર્ગપ્રકાશિની ।
મોક્ષરૂપા મોક્ષગૃહા કર્ત્રી મોક્ષસ્ય જાહ્નવી ॥ ૨૬॥

જહ્નુકન્યા જલાવાસા જલાધીશા જલપ્રિયા ।
સમુદ્રગા વિહઙ્ગાચ ગઙ્ગા શિવશિરઃ સ્થિતા ॥ ૨૭॥

શિવરૂપા શિવકરી શિવહૃદ્યા શિવંવદા ।
શિવપ્રિયા શિવગતિઃ શિવમાર્ગરતિપ્રદા ॥ ૨૮॥

શિવાચારપ્રિયા ગુર્વી ગુપ્તિર્ગુપ્તગતિર્નૃણામ્ ।
ગુપ્તા ગુપ્તતરા ગોપ્યા ગોપ્યવિદ્ભિઃ સમર્ચિતા ॥ ૨૯॥

ગુપ્તાલયા ગુપ્તરૂપા ગુપ્તમાર્ગપ્રવર્તિકા ।
લક્ષ્મીહ્રીશ્રીદયામૂર્તિસ્તુષ્ટિઃ પુષ્ટિઃ સ્તુતિઃ પ્રભા ॥ ૩૦॥

ક્ષમા મેધા સુધા વિદ્યા શુદ્ધિર્બુદ્ધિધૃતિર્ગતિઃ ।
પ્રચણ્ડચણ્ડમુણ્ડઘ્ની રક્તબીજવિનાશિની ॥ ૩૧॥

મથુરા દ્વારકા કાઞ્ચી માહિષ્મત્યથ કૌશિકી ।
અયોધ્યા કર્ણિકા કાશીવાસિની કર્મવર્દ્ધિની ॥ ૩૨॥

શાન્તા શાન્તિકરી પુષ્ટા શાન્તવિજ્ઞાનદાયિકા ।
શાન્તિરૂપાસદા સાઙ્ગા સાઙ્ગોપાઙ્ગગતિપ્રિયા ॥ ૩૩॥

મનોહરા મનોજ્ઞાચ મનોવૃત્તિપ્રકાશિની ।
મનઃકાન્તિભ્રમકરી ભ્રામરી ભ્રમકારિકા ॥ ૩૪॥

જગદ્ભ્રમણધારાચ જગતો મુક્તિકારિણી ।
જગન્માતા જગદ્ધાત્રી જગજ્જીવનજીવિકા ॥ ૩૫॥

જગન્મૂર્તિર્જગદ્દેહા જગતાં જીવનૌષધી ।
જગતાં બુદ્ધિસન્દાત્રી જગતાં બુદ્ધિહારિણી ॥ ૩૬॥

માયા મુદ્રા મહાવિદ્યા મહાયોગીશ્વરી મહી ।
યોગયુક્તા યોગવિદ્યા યોગાઙ્ગાયોગવલ્લભા ॥ ૩૭॥

યોગવિદ્યેશ્વરી યોગ્યાયુક્તાહારાસુખાન્વિતા ।
યોગૈકસાધ્યા યોગાદ્યા યોગક્ષેમપ્રવાહિકા ॥ ૩૮॥

વૃન્દાવનપ્રિયા વૃન્દાવૃન્દાવનવિહારિણી ।
વૃન્દાવનકૃતાલાસ્યા વૃન્દાવનવરાર્ચિતા ॥ ૩૯॥

વૃન્દાવનસ્થજન્તૂનાં સર્વતોભદ્રકારિણી ।
વૃન્દાવનરસોત્કણ્ઠા વૃન્દાવનકૃતાલયા ॥ ૪૦॥

વૃન્દાવનપ્રભાવજ્ઞા વૃન્દાવનસુપૂજિતા ।
વેણુવાદરતા વેણુનાદિની કલભાષિણી ॥ ૪૧॥

વૈષ્ણવી વિષ્ણુનિરતા વિષ્ણુમાયાવસુન્ધરા ।
વસુદા વસુકૃદ્રામા વિષ્ણુવામાઙ્ગવાસિની ॥ ૪૨॥

વિષ્ણુભક્તૈઃ સદા સેવ્યા વિષ્ણુભક્તહિતૈષિણી ।
વિષ્ણુવિદ્યા વિષ્ણુરૂપા વિશ્વજ્ઞા ચ વિવેકિની ॥ ૪૩॥

વિવેકદાયિકા સાધ્વી સમ્યક્સાધુજનાર્ચિતા ।
સમ્યગ્જ્ઞાનપરા સમ્યક્ સમ્યગ્વિદ્યાવિશારદા ॥ ૪૪॥

સારદા શારદા સાધ્યા શરત્પૂર્ણનિભાનના ।
શરાહ્વયા સદાહ્લાદકારિણી જયદા મતા ॥ ૪૫॥

માતા માતામહી મન્ત્રા મૂર્તિર્વન્દ્યા પિતામહી ।
અર્થૈશ્વર્યકરી પ્રજ્ઞા બ્રાહ્મીનારાયણી દયા ॥ ૪૬॥

પુણ્યાપુણ્યવિધાનજ્ઞા પુણ્યદેવદ્વિજાર્ચિતા ।
પુણ્યમૂર્તિઃ પુણ્યદેહા પુણ્યગ્રામનિવાસિની ॥ ૪૭॥

ગોકુલસ્ય પ્રિયા દેવી ગોકુલે સર્વનર્મદા ।
ગોકુલાચારસર્વજ્ઞા ગોકુલસ્ય સુખાર્થિની ॥ ૪૮॥

ગોકુલીયૈઃ સદા ધ્યેયા ગોકુલાય ગતિપ્રદા ।
ગોકુલાચારવિદુષી ગોકુલાચારવર્ણિની ॥ ૪૯॥

સુરારિદમની દિવ્યા સુરવૃન્દવિનાશિની ।
દુષ્ટદાનવસંહર્ત્રી કંસચાણૂરમર્દિની ॥ ૫૦॥

કુમારી કુલજા કુન્તી કુલસ્ત્રી કુલપાલિકા ।
પાઞ્ચાલી દ્રૌપદી સીતા તારા શૈબ્યાઽથ રુક્મિણી ॥ ૫૧॥

સત્યભામા તથા સત્યા સત્યધર્મપરાયણા ।

બૃહતીચ તથા સ્થૂલા સૂક્ષ્મા હ્રસ્વાચ દીર્ઘિકા ॥ ૫૨॥

યશોદાદેવકી ચિત્તિરન્તઃસંલગ્નમાનસા ।
રોહિણી કુબ્જિકા ગુર્વી કિશોરી ષોડશાબ્દિકા ॥ ૫૩॥

ચિત્રિણી ચિત્રભાવજ્ઞા ચિત્રકર્મકરી સદા ।
વિચિત્રાભરણાનન્દવ્રજસૌભાગ્યવર્દ્ધિની ॥ ૫૪॥

નન્દસ્તુતા નન્દપ્રિયા નન્દાનન્દકરી મહી ।
નન્દાદિગોપૈઃ પ્રણતા નન્દસ્મરપ્રભાવતી ॥ ૫૫॥

યમુનાકૃતસઙ્ક્રીડા યમુનારૂપધારિણી ।
યમુનાયાં સદાસ્નાતા યમુનારામકારિણી ॥ ૫૬॥

ગુણાઢ્યા ગુણદા ગુણ્યા ત્રિગુણા ગુણનિર્વૃતા ।
ગુણાન્વિતા ગુણમયી ગુણગ્રામનિવાસિની ॥ ૫૭॥

ગોપસ્ત્રીભિઃ પરિવૃતા ગોપકન્યાવિનોદિની ।
ગોપસ્ત્રીણાં પરાશક્તિઃ પરમામૃતવર્ષિણી ॥ ૫૮॥

પરમાનન્દસન્તુષ્ટા બ્રહ્માનન્દમયીશ્વરી ।
બ્રહ્માનન્દપ્રિયા બ્રહ્મવાદિની બ્રાહ્મણપ્રિયા ॥ ૫૯॥

સરસ્વતી ત્રિવેણી ચ પુષ્કરા પુષ્કરાલયા ।
ત્રયીમયી સ્મૃતિમયી વેદમાર્ગવિભૂષણા ॥ ૬૦॥

વેદમાર્ગરતાવેદવેદ્યા વિદ્વત્સુપૂજિતા ।
પુરાણગીતગુણિકા પુરાણવ્રતશોભના ॥ ૬૧॥

પુરાણાતિપુરાણામ્બા પુરાણપરમાર્થદા ।
ભૂતા ભૂતપ્રિયા ભૂતગ્રામપાલનમાનસા ॥ ૬૨॥

ભૂતવર્ગધરા ભૂતપોષણવ્રતપાલિકા ।
ભૂતાનન્દકરી ભૂતમાતા ધાત્રી ધૃતિઃ ક્રિયા ॥ ૬૩॥

ભૂતપ્રાણપ્રિયા ભૂતરક્ષિકા ભૂતદર્પહા ।
શર્વાણી સર્વદા સાર્વી સર્વમોહવિધાયિની ॥ ૬૪॥

સર્વસઙ્કટસંહર્ત્રી સર્વસિદ્ધિસમન્વિતા ।
સર્વાધારા સર્વમયી સર્વરૂપા સદાનવા ॥ ૬૫॥

સર્વશક્તિઃ પરં જ્યોતિઃ સર્વશસ્ત્રપ્રણાશિકા ।
રાગિણી રાગજનની રાગભૂમિર્દૃઢવ્રતા ॥ ૬૬॥

રાગવશ્યા વીતરાગા સર્વરાગાનુરાગિણી ।
ધર્મદા ધર્મધારા ચ ધનદા ધાન્યદા શુચિઃ ॥ ૬૭॥

ભોગમુક્તિવ્રતાધારા ભોગમુક્તિસ્વરૂપિણી ।
પાનની પાવનગુણા પામરાણાં ચ પાવની ॥ ૬૮॥

પાવનશ્રાવિણી શશ્વત્પાવનશ્રવણાત્મિકા ।
પાર્વતી પર્વતસુતા પર્વતેષુ વિહારિણી ॥ ૬૯॥

શ્રીકૃષ્ણાન્વેષણપરા કૃષ્ણદર્શનલાલસા ।
તત્ત્વાત્મિકા તત્ત્વભાવા તત્ત્વાનાં તત્ત્વવર્ધિની ॥ ૭૦॥

તત્ત્વાનુરાગિણી બાલા તત્ત્વાકર્ષણકારિણી ।
તત્ત્વોત્પત્તિવિધાનજ્ઞા તત્ત્વાનાં નાશકારિણી ॥ ૭૧॥

તત્ત્વવિદ્ભિઃ સદા ધ્યાતા તત્ત્વવિન્મોક્ષદાયિકા ।
તત્ત્વવિદ્વિઘ્નશમની તત્ત્વવિદ્યાધિકારિકા ॥ ૭૨॥

તત્ત્વવિત્પ્રદસર્વસ્વા તત્ત્વવિત્પ્રાણરક્ષિકા ।
શઙ્ખિની શઙ્ખહસ્તા ચ શઙ્ખનાદકરી પ્રિયા ॥ ૭૩॥

ચક્રિણી ચક્રવૃત્તિજ્ઞા દુષ્ટચક્રક્ષયઙ્કરી ।
શૂલિની શૂલહસ્તા ચ ભક્તાશૂલકરી સદા ॥ ૭૪॥

ગદનિગદસંહર્ત્રી અગદઙ્કારજીવિની ।
સદાચારરતા સાધ્વી સદાચારપ્રકાશિની ॥ ૭૫॥

સદાચારાઽસદાચારદૂરકર્ત્રી સદાર્તિહા ।
સદાચારવિશેષા ચ સદાચારપ્રમાણિકા ॥ ૭૬॥

સઙ્કેતનિરતા લોલા સઙ્કેતસુસમાહિતા ।
સઙ્કેતસ્વામિની શ્યામા સઙ્કેતપ્રીતિદા શુભા ॥ ૭૭॥

સુસઙ્કેતકૃતક્રીડા સઙ્કેતકૃતનિશ્ચયા ।
રામારામાગતા રામપ્રિયા દુઃખાદિભઞ્જિકા ॥ ૭૮॥

પદ્મા પદ્મમુખી પદ્મવાસિની પદ્મભૂષણા ।
પદ્માલયા પદ્મહસ્તા પદ્માક્ષી પદ્મિની પુરી ॥ ૭૯॥

પદ્મવર્ણા પદ્મગર્ભા પદ્મનામ્ની મહાનિધિઃ ।
રુક્માઙ્ગપારુક્મપર્ણા રુક્મદાત્રી ચ નિર્ભયા ॥ ૮૦॥

રુક્માધારારુક્મરુક્મા રુક્મિણી રુક્મપ્રીતિદા ।
કામિની કામભૂઃ કામ્યા કમનીયા કુટુમ્બિની ॥ ૮૧॥

કમનીયસ્વભાવાઢ્યા કરુણાકારિણી કુરુઃ ।
કામરૂપા કામ્યમાના કામદેવકૃપાધરા ॥ ૮૨॥

કાલકર્ત્રી કલા કલ્યા કલિની કુલભામિની ।
તુલસી ચ તુલા તન્દ્રા તોતલા તારકા ધ્વનિઃ ॥ ૮૩॥

તનુકા તાલવદ્દીર્ઘા તારિણી તામસી નવા ।
રમ્ભા તિલોત્તમા રમ્યા રમણીયા વસુન્ધરા ॥ ૮૪॥

કોકિલા કલનિર્હ્રાદા કલકણ્ઠી કલાસુધા ।
સુધાપાનમહાનન્દા શુદ્ધાચારપરાયણા ॥ ૮૫॥

સુધાસમુદ્રલહરી સુધાસિન્ધુનિવાસિની ।
સુધામયી સુધામૂર્તિઃ સુધાકાન્તિઃ સુધાહ્વયા ॥ ૮૬॥

સુધીભિર્વન્દિતા શુદ્ધા શુદ્ધાઙ્ગી શુદ્ધકર્મદા ।
શુદ્ધમાર્ગરતા શુદ્ધકારિકા ભક્તવત્સલા ॥ ૮૭॥

ભક્તાગમનસાકાઝી ભક્તકીર્તિ વિધાયિની ।
સુષુમ્નાચ સુષામા ચ સુષમા પરમા મતા ॥ ૮૮॥

ઇડા ચેડ્યા મહદ્ભિઃ સા સૂર્યવાહા સુશર્મદા ।
ચન્દ્રાદિત્યકલા જ્યોતિઃ સૂર્યચન્દ્રસુકુણ્ડલા ॥ ૮૯॥

સૂર્યમણ્ડલમધ્યસ્થા ચન્દ્રમણ્ડલમાનિતા ।
સૂર્યાગ્નિધામ્ની સર્વેષાં ધામ્ની ધાત્રી ધરિત્રિણી ॥ ૯૦॥

લજ્જાલજ્જાવતી લજ્જાપૂરિણી ક્લેશનાશિની ।
નાનારૂપધરા નાનાવ્યાધિનાશનતત્પરા ॥ ૯૧॥

નાનાગમરહસ્યજ્ઞા નાનાસાધનસાધિકા ।
નાનામન્ત્રવિધાનજ્ઞા નાનામન્ત્રસ્વરૂપિણી ॥ ૯૨॥

નાનાભૂષણભૂષાઙ્ગી નાનાવસ્ત્વર્થગામિની ।

નાનાનાટ્યકલાભિજ્ઞા નાનાશ્લાઘાર્થજ્ઞાપિકા ॥ ૯૩॥

નાનાકર્મકરી નાનાકર્મમાર્ગવિધાયિકા ।
તીર્થનામ્ની ભીતિહરાતીર્થશ્રવણશોધિતા ॥ ૯૪॥

તીર્થસ્થિતાલઙ્કરણા તીર્થાશ્રિતસુખોન્મુખી ।
નિરઞ્જના નિરાલમ્બા નિરાધારા નિરાશ્રયા ॥ ૯૫॥

નિરીહા નિસ્પૃહા નારી નિર્દ્વન્દ્વા નિરહઙ્કૃતિઃ ।
નિર્ગુણાગુણસંયુક્તા નિર્ભ્રમા ભ્રમવર્જિતા ॥ ૯૬॥

ગરુડાસનગામીયા ગારુડી ગરુડાર્ચિતા ।
ગરુડસ્કન્ધસંસ્થાના ગરુડાર્તિવિનાશિની ॥ ૯૭॥

ભાવપૂજકસર્વસ્વા ભાવનિન્દકનાશિની ।
ભાવાનુગાચ ભાવ્યજ્ઞા ભાવાભાવસ્વરૂપિણી ॥ ૯૮॥

ભૂતાભૂતભવિષ્યાદિજ્ઞાનકર્ત્રી ભવાર્તિહા ।
ચાર્વઙ્ગી ચતુરા ચિત્યા ચઞ્ચલા ચઞ્ચરીધ્વનિઃ ॥ ૯૯॥

ચામુણ્ડા ચારુચરણા ચિરચારણમોદિતા ।
વામની વર્તુલમુખી વૃત્તિર્વૃત્તાન્તસેવિતા ॥ ૧૦૦॥

પ્રકૃત્તિકારિણી પ્રાપ્તિઃ પ્રાચી પ્રાણાશુરક્ષિણી ।
પ્રાણપ્રતિષ્ઠા પ્રાકામ્યા પરમાણુપ્રમાણિકા ॥ ૧૦૧॥

પરમા પરમોત્કૃષ્ટા પરમાણ્વી પરાશરા ।
પરભાગવતૈર્ધ્યાતા પરભાગવતાભિધા ॥ ૧૦૨॥

શ્રીભાગવતહાર્દિક્યા શ્રીભાગવતમાનસા ।
શ્રીભાગવતનિષ્ઠાચ શ્રીભાગવતભાવિતા ॥ ૧૦૩॥

શ્રીભાગવતસંવિજ્ઞા શ્રીભાગવતભાષિતા ।
સાવિત્રી શ્રીસચિદ્રૂપાસવિતુઃ સુગતિપ્રદા ॥ ૧૦૪॥

સવિત્રારાધિતપદા સચ્ચિન્મણ્ડલમણ્ડિતા ।
કલ્પાન્તસ્થાપિની કલ્પકલ્પિતા કલ્પનાકુલા ॥ ૧૦૫॥

કલ્પકલ્પાયુષઃ કલ્પકરી કલ્પપ્રભઞ્જિકા ।
મન્વન્તરપ્રિયા મન્વી મન્વન્તરમનુપ્રિયા ॥ ૧૦૬॥

શતરૂપા શતગુણા શતાક્ષી ચ શકુન્તિની ।
સહસ્રાક્ષી દશશતભુજાર્પિતમહાયુધા ॥ ૧૦૭॥

સહસ્રશિરસી માતાસહસ્રચરણૈર્યુતા ।
સહસ્રદલપદ્માન્તર્બદ્ધપદ્માસનાર્ચિતા ॥ ૧૦૮॥

ષટ્કોણયન્ત્રનિલયા ષટ્કોણસ્થાપિતપ્રભા ।
ત્રિકોણગૃહમધ્યસ્થા ત્રિકોણે પૂજિતા શુભા ॥ ૧૦૯॥

તુરીયા ચત્વરાતન્ત્રી તન્ત્રીસ્વરવિડમ્બિની ।
તન્ત્રગીતા તન્ત્રસેવ્યા તન્ત્રોક્તા તાન્ત્રિકી સ્મૃતિઃ ॥ ૧૧૦॥

તન્ત્રવિદ્યા સ્વતન્ત્રાચ પરતન્ત્રપ્રિયા નદી ।
સ્મૃતિસંસ્કારજનની સંસ્કૃતિઃ સંસ્કૃતા પુરા ॥ ૧૧૧॥

સન્ધ્યાધ્યાનરતિઃ શઙ્કા શક્તિઃ સર્વેષુ જન્તુષુ ।
સૌમ્યા સોમાનના સૌમ્યમાર્ગબુદ્ધિપ્રદા નૃણામ્ ॥ ૧૧૨॥

સૌમ્યાગમકરી શુદ્ધા સૌમ્યવાર્તાવિધાયિની ।
સૌમ્યમૂર્તિઃ સૌમ્યદેહા સૌમ્યાચારવિશેષિકા ॥ ૧૧૩॥

સૌમ્યારાધ્યા સૌમ્યયુક્તા સૌમ્યપૂજકપુત્રિણી ।
ગુર્વી ગુરુવિધા ગૌરી ગોરોચનવિભૂષણા ॥ ૧૧૪॥

ગુરુભક્તા ગુરુકુલા ગુરુજ્ઞાના ગુરુસ્પૃહા ।
ગુરુતાલવિશેષજ્ઞા ગુરુપૂજ્યા ગુહાલયા ॥ ૧૧૫॥

સામજ્ઞા સામગાસામવિદિતસ્વાર્થસાધના ।
શચી સરસ્વતી દિવ્યારુન્ધતી પ્રમદોત્તમા ॥ ૧૧૬॥

જયદા જિત્વરા યામ્યા જયજાપ્યા જપાન્તિકા ।
હવિષ્યાહુતિભોક્ત્રી ચ હવિર્ધાની મુનિપ્રિયા ॥ ૧૧૭॥

હોત્રી હોમક્રિયા હોમસન્તુષ્ટા હોમવત્સલા ।
યજુઃ પ્રિયા યજુર્માતા યજુર્વેદપ્રણાલિકા ॥ ૧૧૮॥

યજુર્વેદાભિલાષા ચ યજુર્વેદકૃપાકરી ।
ઋચાં સારાર્થવિદુષી ઋગ્યજુઃ સામગાયની ॥ ૧૧૯॥

સામદાનમિતાનન્દા સામગેયા ચ સામગા ।
સામસામપ્રિયા સિદ્ધિઃ સમાધિનિરતપ્રિયા ॥ ૧૨૦॥

સમાધિશાસ્ત્રશ્રવણા સમાધિર્વ્યાધિનાશિની ।
વિજયા વિશ્વમાતા ચ જયન્તી વીરબાહુકા ॥ ૧૨૧॥

શત્રુઘ્ની શામ્બરી સેનાક્ષૌહિણી દલહારિણી ।
મઞ્જીરપદકા કણ્ઠેહારમાલા કરાઙ્કુશા ॥ ૧૨૨॥

ભુજાઙ્ગદા ગદહરા ગદપીડાક્ષયઙ્કરી ।
શઙ્ખચક્રગદાખડ્ગનિકુરુમ્બાનિ બિભ્રતી ॥ ૧૨૫॥

ગોપિની દ્રાવણકરી દ્રવણાખ્યા સુસંસ્કૃતિઃ ।
વીરભૂમિર્વીરજની વીરપાલનમાનસા ॥ ૧૨૪॥

વીરાકૃતિર્વીરમુખી વીરવિદ્યાવિશારદા ।
વીરાવીરવતી વીરવર્ણિની વીરસુન્દરી ॥ ૧૨૫॥

ક્રોધિની ક્રોધસંવિગ્ના ક્રોધવશ્યકરી પ્રભા ।
ગોમતી ગોધના ગઙ્ગા ગોવર્ધનગિરિપ્રિયા ॥ ૧૨૬॥

ગોવર્ધનધરા શક્તિઃ ગોપાલનપરવ્રતા ।
હૈયઙ્ગવીનરસિકા રસોત્કૃષ્ટારસાયના ॥ ૧૨૭॥

વિરાગિણી વિરાગાચ પૂર્ણવૈરાગ્યદાયિની ।
સરાગા વીતરાગાચ વિરાગા રાગસંયુતા ॥ ૧૨૮॥

વૈરાગ્યજનની સાક્ષાત્ કૃષ્ણભક્તિશરીરભૃત્ ।
વૈરાગ્યાઙ્ગવિધેઃ કર્ત્રી વૈરાગ્યસુખસાગરા ॥ ૧૨૯॥

મૃત્યુદા પાપિવૃન્દાનામાયુર્દા ધર્મધારિણામ્ ।
સુભઙ્ગદા હિ દુષ્ટાનાં શિષ્ટાનાં જ્ઞાનભક્તિદા ॥ ૧૩૦॥

ભયદા પ્રેતભૂતાનાં સાધૂનામભયપ્રદા ।
શિવદા શિવકર્તૃણાં પામરાણાં ક્ષયઙ્કરી ॥ ૧૩૧॥

યોગિનાંયોગદારૂપધારણાધ્યાનતત્પરા ।
બહિર્મુખાનામશુભઙ્કરિકા વાગ્વિલાસિની ॥ ૧૩૨॥

યશોદા ચ યશોરૂપા યશસાંવૃદ્ધિદા મુખી ।
લોકવેદવિધિપ્રૌઢા લોકવેદપ્રલોભિની ॥ ૧૩૩॥

લોકવેદરતા લોકવેદાચારપ્રવાહિકા ।

લોકવેદમયા ભર્ત્રી લોકવેદશુભપ્રિયા ॥ ૧૩૪॥

લોકવેદૈઃ પૂજ્યતમા લોકવેદવ્રતસ્તુતા ।
છાયા સંજ્ઞાનુસૂર્યાચબ્રહ્માણીચ મદાલસા ॥ ૧૩૫॥

મહાહ્રદા મહાવાપી પરિખાચ મહાખનિઃ ।
પ્રાકારવલયા ચૈવ યોગપદ્મધરા ગયા ॥ ૧૩૬॥

કાશાભા કાશિકા કાશી કાશ્મીરચન્દનાર્ચિતા ।
વંશીકરપ્રિયાવંશી વંશીવાદનહર્ષિતા ॥ ૧૩૭॥

વંશીકરા કૃષ્ણવંશી વંશીનાદવિમોહિતા ।
વંશીરૂપરવાકારી વંશીરાગમનોહરા ॥ ૧૩૮॥

વંશીનાદેન સંહૃષ્ટા વંશીધ્વન્યનુકારિણી ।
વંશીવશ્યોર્વશીભ્રાતા વંશીવંશનિપાલિકા ॥ ૧૩૯॥

શ્રુતિસ્મૃતિપ્રિયા પ્રહ્વા શ્રુતિસ્મૃત્યર્થરૂપિણી ।
શ્રુતિસ્મૃતિસદાચારા શ્રુતિસ્મૃત્યર્થવાચિકા ॥ ૧૪૦॥

શ્રુતિસ્મૃતિરતા કાન્તા શ્રુતિસ્મૃત્યર્થપૂરણા ।
શ્રુતિઃ સ્મૃતિસ્તથા તુષ્ટિઃ પુષ્ટિઃ કર્તુર્મહાબલા ॥ ૧૪૧॥

પ્રહ્લાદિની જગન્માતા પ્રહ્લાદભક્તિવર્દ્ધિની ।
હિરણ્યકશિપુચ્છેત્રી પ્રહ્લાદાનન્દકારિણી ॥ ૧૪૨॥

હિરણ્યાક્ષવધોદ્યુક્તા વારાહી પ્રીતિમાનસા ।
રાક્ષસાનાં ક્ષયકરી દેવતાનાં જયાવહા ॥ ૧૪૩॥

બલિપ્રિયા સદા સ્વેક્ષ્યા બલિનાં બલદા બલા ।
બલાસુરહરાવલ્લી બલિભુગ્બલઘાતિની ॥ ૧૪૪॥

રાજનીતિઃ ક્રિયારૂપારાજ્યહા રાજ્યભક્ષણા ।
રાજરાજૈઃ સ્તુતા સ્તુત્યા સ્તવનીયગુણા સતી ॥ ૧૪૫॥

ષડૂર્મિહરિણી ષડ્ભા ષડ્ગુણા ત્રિગુણાલયા ।
નિષ્કામધર્મનિરતા સકામા કામનિર્મલા ॥ ૧૪૬॥

આર્યા દાક્ષિણ્યરૂપા ચ દક્ષિણા યજ્ઞપાવની ।
દક્ષિણાગમવિદ્યા ચ દક્ષિણાનાં વશંવદા ॥ ૧૪૭॥

મુદ્રા મુદ્રાપ્રિયા મુદ્રાવિધાનજ્ઞા મુદાન્વિતા ।
નિષ્કલઙ્કા કલાધારા સૂર્યચન્દ્રાગ્નિલોચના ॥ ૧૪૮॥

દુર્ગા દુર્ગગતિર્દુર્ગાસુરમારણપણ્ડિતા ।
ત્વગસ્થિમાંસરુધિરસ્નાયુમજ્જાદિશક્તિદા ॥ ૧૪૯॥

ગ્રહરૂપા ગ્રહમયી વિગ્રહા ગ્રહિકા નિશા ।
ગ્રહણા ગ્રાહિણી ગ્રામગ્રાહિણી ગ્રામવલ્લભા ॥ ૧૫૦॥

ગ્રામાચારપરાપૂજ્યા ગ્રામશર્માધિદાયિની ।
સુભદ્રા ભદ્રકાલી ચ ભદ્રમાર્ગપ્રવર્તિકા ॥ ૧૫૧॥

ભદ્રાસના ભદ્રમતિર્ભદ્રાઙ્ગા ભદ્રકારિણી ।
પૃથિવ્યપ્તેજસાં રૂપા ચાદ્યાકાશસ્વરૂપિણી ॥ ૧૫૨॥

કાવ્યશક્તિઃ કવિત્વજ્ઞા કવિરૂપા કવિપ્રિયા ।
શિવા શિવઙ્કરી કમ્બુકણ્ઠી સર્વાઙ્ગસુન્દરી ॥ ૧૫૩॥

ભક્તોદ્ગીતા ભક્તકામ્યા ભક્તસર્વસ્વદા સતી ।
રજો રજોયુતા રક્તા રજસઃશુદ્ધિસાધિકા ॥ ૧૫૪॥

સત્ત્વા ચ સત્ત્વસમ્પન્ના સત્ત્વગુણ્યા ગુણાલયા ।
સાત્વિકીસત્ત્વસમ્પૂર્ણા સત્ત્વવૃત્તાન્તવૃત્તિદા ।
સત્ત્વાહારા સત્ત્વયોનિઃ સત્ત્વવર્ણાધિનન્દિની ॥ ૧૫૫॥

સર્વશાસ્ત્રમયી વિદ્યા સર્વદેવમયી પ્રભા ।
સર્વવર્ણમયી શય્યા સર્વાભરણભૂષિતા ॥ ૧૫૬॥

સર્વસામર્થ્યદાત્રીચ સર્વમઙ્ગલમાલિની ।
સર્વાશ્રયાસાર્વભૌમા સર્વરૂપાગમપ્રભા ॥ ૧૫૭॥

ગાન્ધર્વી કિન્નરી દેવી મોહકર્ત્રી સુબુદ્ધિદા ।
લજ્જાશીલા ત્રપાશીલા શીલસન્તોષસંયુતા ॥ ૧૫૮॥

કામાક્ષી કામિની કામ્યા કમનીયવપુર્ધરા ।
કામરૂપા સિદ્ધિરૂપા સિદ્ધૈર્વન્દ્યા સુસિદ્ધિદા ॥ ૧૫૯॥

શ્રીવિદ્યા ત્રિજટા દેવી લક્ષ્મીર્નીલસરસ્વતી ।
પીતામ્બરા તથાદ્યા ચ સર્વવિદ્યામયીશ્વરી ॥ ૧૬૦॥

વ્યક્તાઽવ્યક્તાઽનેકમૂર્તિઃ સર્વતીર્થફલાધિકા ।

શ્રીરૂપા શ્રીસ્તુતા શ્રાવ્યા શ્રવણાત્પાપનાશિની ॥ ૧૬૧॥

સર્વધર્મવદાન્યાચ નિન્દાનિન્દકનાશિની ।
શ્રીપ્રસાદકરી શ્રદ્ધામેધારૂપાસુશર્મદા ॥ ૧૬૨॥

ગોપી ગિરિસુતા ગુર્વી ગૌરી ગૌઃ સર્વતોમુખી ।
ચતુર્ભુજા દશભુજા ચતુર્વર્ગફલપ્રદા ॥ ૧૬૩॥

ચર્મણ્વતી વેદવતી ચતુરાચાતુરી કલા ।
ષોડશાધિસહસ્રાણાં સ્ત્રીણાં મધ્યે તુવન્દિતા ॥ ૧૬૪॥

નવમી પઞ્ચમીભૂતા ષષ્ઠી ષષ્ઠી ચ સપ્તમી ।
અમાચ પૂર્ણિમા પૂર્ણા શિવરાત્રિઃ પ્રભાવતી ॥ ૧૬૫॥

ચતુઃષષ્ટિકલાયુક્તા ષોડશી ત્રિપુરેશ્વરી ।
સર્વપ્રાણમયી વન્દ્યા દૃઢબન્ધવિમુક્તિદા ॥ ૧૬૬॥

સર્વાધારા સર્વદેવી સર્વારાધ્યા સમાલિકા ।
મન્ત્રબીજરહસ્યાદિસર્વવિદ્યાપ્રકાશિની ॥ ૧૬૭॥

સર્વવર્ણમયીન્દ્રાણી જપજાપ્યપરા ચ સા ।
શ્રીધરી શ્રીધરાવન્દ્યા શ્રીધરપ્રાણવલ્લભા ॥ ૧૬૮॥

શ્રીરાધા (શ્રી) કૃષ્ણહૃદયા શ્રીધરપ્રાણજીવની ।
શ્રીધરસ્ય પ્રતાપાદિશા(જ્ઞા) પિકાખિલકારણમ્ ॥ ૧૬૯॥

સર્વાનુસ્યૂતશક્તિશ્ચ બૃહદ્વૃન્દવનાલયા ।

ઇતીદં રાધિકાદેવ્યા દિવ્યં નામસહસ્રકમ્ ।
મયા સમ્યક્તયા પ્રોક્તમૃષે ત્વદ્ધિતકામ્યયા ॥ ૧૭૦॥

યઃ પઠેત્ પ્રાતરુત્થાય શુચિસ્તદ્ગતમાનસઃ ।
સ ભવેત્સર્વસમ્પૂર્ણઃ શુભાચારઃ પરાત્પરઃ ॥ ૧૭૧॥

પ્રજ્ઞાચક્ષુર્લભેદૃષ્ટિં નેત્રરોગૈર્ન પીડ્યતે ।
મૂકોવાચં લભેત્સર્વલક્ષણૈઃ સંયુતાં શુભામ્ ॥ ૧૭૨॥

પ્રાતઃકાલેઽથ સાયાહ્ને નિશીથે યઃ પઠેત્સ્તવમ્ ।
શ્રીરાધાકૃષ્ણસાક્ષાત્કારોજાયતે સુનિશ્ચિતમ્ ॥ ૧૭૩॥

વૈષ્ણવેષુ ભવેદ્ધન્યસ્ત્રિષુ લોકેષુ વિશ્રુતઃ ।

ધર્મકર્તૃષુધર્મીશઃ પઠેદ્યઃ સ્તોત્રમુત્તમમ્ ॥ ૧૭૪॥

સ યોગી પરમોત્કૃષ્ટઃ સ ઋષિઃ સર્વવેદવિત્ ।
સ જ્ઞાની સ ચ ભક્તસ્તુ સ કર્મસકલાર્થવિત્ ॥ ૧૭૫॥

સ ઇન્દ્રઃ સ હરિર્બ્રહ્મા સ રુદ્રો બ્રહ્મરૂપવિત્ ।
સશેષઃ સ મુનિર્વ્યાસો દત્તાત્રેયઃ સદાશિવઃ ॥ ૧૭૬॥

પ્રાતરુત્થાય યોઽધીતે નામ્નાં દશશતીમિમામ્ ।
સર્વતીર્થેષુ યત્સ્નાનં સર્વલોકેષુ યદ્ધિતમ્ ॥ ૧૭૭॥

સર્વવેદેષુ યત્સર્વં સર્વસ્મૃતિષુ યત્ફલમ્ ।
પુરાણેષુ ચ શાસ્ત્રેષુ તથા ગીતપ્રહેલિષુ ॥ ૧૭૮॥

યત્સારં યચ્ચ હાર્દં તુ યા શક્તિઃ સર્પદસ્યુહૃત્ ।
તત્સર્વમિદમાખ્યાતં નાતઃ કિઞ્ચિત્પરં મુને ॥ ૧૭૯॥

ધન્યં યશસ્યમાયુષ્યં શ્રીકૃષ્ણપ્રેમવર્દ્ધનમ્ ।
ઇદમેકં મયા દૃષ્ટં રાધાનામસહસ્રકમ્ ॥ ૧૮૦॥

સર્વપાપપ્રશમનમકાલમૃત્યુનાશનમ્ ।
સર્વમાઙ્ગલ્યદમિદં પઠિતવ્યં મુમુક્ષુભિઃ ॥ ૧૮૧॥

સર્વાગમપ્રિયં હ્યેતત્ સર્વપાપપ્રણાશનમ્ ।
સર્વવેદશિરોભાગે સર્વાધિવ્યાધિશાન્તિકૃત્ ॥ ૧૮૨॥

ભાવુકં ભવ્યસાધૂનાં તારક તત્ત્વમીક્ષતામ્ ।
મારકં સર્વદુષ્ટાનામિદમેવ હિ નિર્મિતમ્ ॥ ૧૮૩॥

એતસ્ય પઠનાત્સદ્યોમુક્તિઃ સ્યાદનપાયિની ।
ભક્તિરપ્યસ્ય શ્રીકૃષ્ણે રાધયા સહિતે ભવેત્ ॥ ૧૮૪॥

કૃષ્ણવશ્યકરં સમ્યક્ જ્ઞાનવિજ્ઞાનવર્દ્ધનમ્ ।
બહુ કિં પઠનાદસ્ય માસૈકેન મહામુને ॥ ૧૮૫॥

ભક્તિયુક્તોલભેજ્જ્ઞાનં શ્રદ્ધાવાંશ્ચેન્મુનિઃ પઠેત્ ।
આયુરારોગ્યમૈશ્વર્યં જ્ઞાનં વૈરાગ્યસંયુતમ્ ॥ ૧૮૬॥

યદ્યદિષ્ટતમંલોકે તત્તદાપ્નોત્યસંશયમ્ ।
મહતાં સઙ્ગતિકરં મહદ્ભાગ્યોદયપ્રદમ્ ॥ ૧૮૭॥

મહતાં હિ સદા સેવ્યમિદમેવ હ્યુદાહૃતમ્ ।
વેદશાસ્ત્રપુરાણેભ્ય ઇદમેવ સમુદ્ધૃતમ્ ॥ ૧૮૮॥

તસ્માત્સર્વપ્રયત્નેન રાધાનામસહસ્રકમ્ ।
ભૂતાષ્ટમ્યામમાયાં ચ સઙ્ક્રાન્તૌ વ્યતિપાતકે ॥ ૧૮૯॥

સૂર્યચન્દ્રોપરાગેચ પઠિતવ્યં શુભેપ્સુભિઃ ।
પઠ્યમાનમિદં સ્તોત્રં શ્રદ્ધયા યઃ શ‌ૃણોતિચ ॥ ૧૯૦॥

સર્વાભીષ્ટેન સંયુક્તો જાયતે રાધિકાજ્ઞયા ।
એકાદશ્યાં મહારાત્રૌ દ્વાદશ્યાં ગ્રહપર્વણિ ॥ ૧૯૧॥

પઠતાં શ‌ૃણ્વતાં પુંસાં તેષાં મુક્તિર્ન દુર્લભા ।
હિક્કારોગસ્તથા છર્દિર્મૂત્રકૃચ્છ્રં તથા જ્વરઃ ॥ ૧૯૨॥

અતીસારસ્તધા શૂલં આમવાતાદયોઽપિ ચ ।
અન્યે ચ બહવો રોગાઃ સન્નિપાતમુખા ઋષે ॥ ૧૯૩॥

શાન્તિં પ્રયાન્તિ તે સર્વે સ્તોત્રસ્યાસ્ય પ્રભાવતઃ ।
સ્તોત્રસ્ય પઠનાદસ્ય પ્રહ્લાદઃ સિદ્ધતાં ગતઃ ॥ ૧૯૪॥

યુધિષ્ઠિરોઽધ ભીષ્મશ્ચ જામદગ્ન્યોદ્ધવૌ તથા ।
હરિશ્ચન્દ્રામ્બરીષૌ ચ બ્રહ્મપુત્રાસ્તથાઽનઘાઃ ॥ ૧૯૫॥

એતે સિદ્ધિં ગતાઃ સર્વે સત્યં સત્યં વદામ્યહમ્ ।
શ્રીરાધાયાઃ પ્રસાદેન સર્વાનુગ્રહણે ક્ષમાઃ ॥ ૧૯૬॥

તસ્માત્સદેયમેવાત્ર પૂજનીયા મુહુર્મુહુઃ ।
અથાસ્યસાધનં વક્ષ્યે ઉભયોઃ પ્રીતિવર્દ્ધનમ્ ॥ ૧૯૭॥

પ્રાતરુત્થાય કર્ત્તવ્યં સાધકેન શુભેચ્છુના ।
પ્રક્ષાલ્ય હસ્તૌ પાદૌ ચ ત્રિરાચમ્ય શુચિઃ પુમાન્ ॥ ૧૯૮॥

જલાશયે તથા નદ્યાં દેવખાતે હ્રદે તથા ।
કૂપે ગૃહે સ્વકીયે વા સ્નાયાદ્વૈ વિધિપૂર્વકમ્ ॥ ૧૯૯॥

સદાચારં તતઃ કૃત્વા પુષ્પધૂપાદિચન્દનૈઃ ।
પુસ્તકં તુ પ્રપૂજ્યાથ મન્ત્રરાજમુદીરયેત્ ॥ ૨૦૦॥

અથ મન્ત્રં પ્રવક્ષ્યામિ વિષ્ણુભક્તિકરં નૃણામ્ ।
તારં રમાનાથસૈવતગઃ યદિ મુદીર્ય ચ ॥ ૨૦૧॥

પપઞ્ચમો ભગાદ્યાશ્ચ ભક્તિં દેહિ તતઃ પરમ્ ।
દેહિ દેહિ તતઃ પશ્ચાત્તારં તત્ર પુનર્વદેત્ ॥ ૨૦૨॥

સંપ્રોક્તો મન્ત્રરાજોઽયં શ્રીરાધાયા ઋષે તવ ।
દશવારમસૌ મન્ત્રો જપ્યશ્ચ પ્રથમં મુદા ॥ ૨૦૩॥

તતઃ સહસ્રનામેદં પઠિતવ્યં મુને ત્વયા ।
એકકાલસ્ય પઠનાદ્વિષ્ણુભક્તો ભવેદ્યદિ ॥ ૨૦૪॥

દ્વિત્રિકાલસ્ય પઠનાદ્ભક્તિઃ સ્યાદનપાયિની ।
એકોઽદ્વયાત્મકો મન્ત્રસ્ત્રિષુ લોકેષુ દુર્લભઃ ॥ ૨૦૫॥

ગોપનીયઃ પ્રયત્નેન કૃષ્ણસ્ય પદમિચ્છતા ।
એકોઽદ્વયાત્મકો મન્ત્રસ્તુભ્યમુક્તો મયા મને ।
તસ્માત્ત્વયાઽપિ ધૂર્તેભ્યઃ સન દેયઃ કદાચન ॥ ૨૦૬॥

ઇદં ખલાય પશવે વેદાનાં નિન્દકાય ચ ।
અશ્રદ્ધાયાતિમૂર્ખાય પરસ્ત્રીલમ્પટાયચ ॥ ૨૦૭॥

દુરાચારાય મૂઢાય ગીલાયાવ્રતરૂપિણે ।
નિર્દયાયાતિહ્રસ્વાય નાસ્તિકાયાત્મઘાતિને ॥ ૨૦૮॥

નૈવ દેયં સ્તોત્રમિદન્ન પ્રકાશ્યં સુદુર્લભમ્ ।
દદાતીદં ય એતેભ્યઃ શિવહાસ નિગદ્યતે ॥ ૨૦૯॥

ભક્તાય ભક્તિયુક્તાય સર્વભૂતદયાલવે ।
શમદમાદિયુક્તાય સ્વચ્છાન્તઃકરણાય ચ ॥ ૨૧૦॥

ગુરુપૂજાપરાયાથ શ્રદ્ધાચારયુતાય ચ ।
ચિદ્વિલગ્નાય યોગ્યાય મુદ્રામાલાધરાય ચ ॥ ૨૧૧॥

જિતક્રોધાય શાન્તાય વિષ્ણુવ્રતપરાય ચ ।
અન્યૈરપિ ગુણૈઃ શશ્વત્ તિતિક્ષાક્ષાન્તિરાર્જવૈઃ ॥ ૨૧૨॥

યુક્તાય સાધકાયાથ દેયં સ્તોત્રમિદં મુદા ।
નન્વીદૃશાય ભક્તાય યો દદાતિ શુભં ત્વિદમ્ ॥ ૨૧૩॥

સ વૈ પુણ્યતમો લોકે તત્પરો નૈવ કશ્ચન ।
તસ્માન્મુનેઽત્ર વિખ્યાતં મયા ત્વદ્ધિતકામ્યયા ॥ ૨૧૪॥

ઇદં પઠસ્વચ શ઼ૃણુ યદીચ્છસિ હરિં પ્રભુમ્ ।
એતસ્ય પઠનાદ્દેવઃ કૃષ્ણસ્તે સંપ્રસીદતિ ॥ ૨૧૫॥

અથ કિં બહુનોક્તેન વર્ણનેન પુનઃ પુનઃ ।
વશયેદ્રાધિકાકૃષ્ણૌ નિત્યં પાઠકરઃ પુમાન્ ॥ ૨૧૬॥

ઇતિ રુદ્રયામલતઃ કૃતં શ્રીરાધાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Manish Gavkar

---

*Radhasahasranamastotram 2*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*